**Swami Vivekananda Advanced Journal for Research and Studies**
Online Copy of Document Available on: www.svajrs.com

**ISSN:2584-105X** **Pg. 86 - 89**



# वैदिकवाङ्मये श्रीमद्भगवद्गीतायाः स्थानम्

**डा.सुदेष्णा दाशः**
Asistant Professor, (Guest), Rajendra University, Prajna Vihar, Balangir
dashsudeshna6@gmail.com

***Accepted: 14/07/2025***
***Published: 17/07/2025***

**शोधसारः**

श्रीमद्भगवद्गीताशास्त्रं वैदिकवाङ्मये सम्पूर्णवेदस्थानीयमिति शास्त्रविदां मतम्। वेदवत् त्रिकाण्डात्मकत्वात्, समस्तवेदार्थसारसंग्रहभूतत्वात, सर्वशास्वरुत्वात्, सर्वसाधारणलोको- पकारत्वाच्च। प्रसिद्धश्चैतादृश्येव-

**गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः।**

**या स्वयं पद्मनाभस्य मुखपद्माद्विनिस्सृताः ।।**

वासुदेवपार्थयोः संवादरूपायाः गीतायाः अवसाने अर्जुन उवाच। नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्म याच्युत । स्थितोऽस्मि । गतसन्देहः करिष्ये वचनं तव । अनेन मोहनाश प्रश्नप्रतिवचनेसर्वशास्त्रार्थज्ञान फलमेतावदेवेति निश्चितं दर्शितं भवति । यतो ज्ञानान्मोहनाश आत्मस्मृतिलाभश्चेति। तथा च श्रुतावनात्माविच्छोचामीत्युपन्यस्यात्मज्ञानेन सर्वग्रन्थिविप्रमोक्ष उक्तः भिद्यते हृदयग्रन्थिस्तत्र को मोहः **कः शोकः एकत्वमनुपश्यतः इति च मन्त्रवर्णः।**

**उपक्रमः-**

एतस्याः गीतायाः शास्त्रत्वे भगवतः स्ववचनमेव प्रमाणम्-

**इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ ।**

**एतद्बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारत[1] ।।**

अत्र शङ्करभगवत्पादाः-इत्येतद् गुह्यतमं गोप्यतममत्यन्तरहस्यमित्येतत्। किं तच्छास्त्रम्, तच्छास्त्रम् यद्यपि गीताख्यं समस्तं शास्त्रमुच्यते तथाप्यमेवाधार्य इह शास्त्रमित्युच्यते, स्तुत्यर्थं प्रकरणात्। सर्वो हि गीताशास्त्रार्थोयऽस्मिन्नाध्याये समासेनोक्तो न केवलं सर्वश्च वेदार्थ इह परिसमाप्तो "यस्तं वेद स वेदवित्""वेदैश्च सर्वैरहमेव वेद्यः"। इति चोक्तम्। इदमुक्तं मया हेऽनघापाप। एतच्छास्त्रं यथादर्शितार्थं बुध्या बुद्धिमान् स्यात् भवेन्नान्यथा। कृतकृत्यश्च भारत कृतं कृत्यं कर्तव्यं येन स कृतकृत्यो विशिष्टजन्मप्रसूतेन बाद्बष्णेन यत्कर्तव्य भारले भगवत्तत्वविदिते कृतं भवेदित्यर्थः। न चान्यथा कर्त्तव्यं परिसमाप्यते कस्यचिदित्यभिप्रायः।

**सर्व कर्माखिलं पार्थ ज्ञाने परिसमाप्यते । इति च उक्तम्-**

**एतद्धि जन्मसामग्र्यं ब्राह्मणस्य विशेषतः।**

**प्राप्यैतत्कृत्यो हि द्विजो भवति नान्यथा[2] ।।**

इति च मानवं वचनम् । यत् एतत्परमार्थतत्त्वं मत्तः श्रुतवानसि ततः कृतार्थस्त्वं दुर्विज्ञेयार्थं तदर्थाविष्करणायानेकैः विवृतपदार्थवाक्यार्थन्यायमत्यन्तविरुद्धानेकार्थत्वेन लोकिकै-गृह्यमाणमुप-लभ्याहं विवेकतोऽर्थनिर्धारणार्थं संक्षेपतो विवरणं करिष्यामि ।परोक्षार्थ तु सर्वत्र वेदादप्युत्तमं च यत् इति स्कान्थे । तत्र च वासुदेवार्जुन संवादरूपां सर्वभारतार्थसंग्रहां-

**भारतपारिजातमधुभूतां गीतामुपनिबंध।**

**भारतं सर्वशास्त्रेषु भारते गीतिका वरा ।।**

**विष्णो सहस्रनामापि ज्ञेयं पाठ्यं च तद्वयम्** इति महाकाव्ये ।।

सारथ्यमर्जुनस्यादौ कुर्वन्गीतामृतं ददौ । लोकत्रयोपकाराय तस्मै कृष्णात्मने नमः ।।

**मलनिर्मोचनं पुंसां जलस्नानं दिने दिने ।**

**सकृदीताम्भसि स्नानं संसारमलनाशनम् ।।**

**अकृत्यमपि कुर्वाणो भुञ्जानोऽपि यथा तथा ।**

**कदाचिन्नारकं दुःखं गीताध्यायी न पश्यति ।**

**वेदादधिप्रमथितं वासुदेव समुद्धृतम् ।**

**सन्तः पिबन्ति सततं गीतामृतरसायनम् ।**

**एकं शास्त्रं देवकीपुत्रगीतमेकोदेवो देवकीपुत्र एव ।**

**एको मन्त्रो तस्य नामानि यानि कर्माप्येकं तस्य देवस्य सेवा[3]।।**

गीतैव तत्त्वहितायोर्यथावच्छासनात् शास्त्रम्। उपनिषत्समाधिना सिद्धव्यवहार- निरूढेः। स्त्रीलिङ्गनिर्देशः। एतेन शास्त्रान्तरादयस्य शास्त्रस्याधियं व्यञ्जितम् । स्वयं च महाभारते महर्षिणोक्तम्- अत्रोपनिषदं पुण्यं कृष्णद्वैपायनोऽब्रवीत्। (म. भा. आ.प.१४.२७९) इति उक्तं चाभियुक्तैः - यस्मिन् ।

**प्रसादसुमुखे कवयोऽपि ये ते शास्त्राण्यशासुरिहतन्महिमा श्रयाणि।**

**कृष्णेन तेन यदिह स्वयमेवगीतं शास्त्रस्य तस्य सदृशं किमिवास्ति शास्त्रम्।**

यद्यपि गीताशास्त्रे शास्त्रपदं श्रुत्यर्थे प्रयुक्तम्-तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ तथापि शास्त्रत्वन्त्वस्याः स्मृतित्वेऽपि न विरुध्यते। प्राय आचार्या स्मृतिनाम्ना गीताश्लोकानुद्धरन्तो दृश्यन्ते वेदार्थसंग्राहकत्त्वान्नास्या श्रुतित्वम्। वेदा एव श्रुतिपदाभिलाप्या इति। गीतायाः स्मृतित्वं शास्त्रत्वं च भगवदुक्तत्वादागमशास्त्रवत्। वर्णाश्रमधर्मप्रतिपादकत्वाच्च मन्वादिवत्। गीताशास्त्रेऽपि वेदवत् प्रवृत्तिनिवृत्तिलक्षणं धर्मद्वयमपि प्रतिपादितम्। **"तत्रापि भक्तिः, ज्ञानं, कर्मयोगानामेकत्रसमन्वये-नाखिललोक-कल्याणपरत्वं सुलभत्वञ्चधिगम्यते"**।

अनुबन्धचतुष्टयवत् शास्त्रमेतदिति विज्ञापितं भवति, सर्वेषामधिकारित्वबोधनात्। शास्त्रस्यास्य सम्बन्धाभिधेयप्रयोजनानि मोक्ष इति निःश्रेयसप्रयोजनवत् । किं च पुरुषार्थान्तराणामविरोधेन परम-प्रयोजनस्यैव मुख्यत्वात्। स च मोक्षः परमार्थ स्वरूपबोधात् गीताशास्त्रप्रतिपादितात्। परमार्थः परमात्मा, तत्परमात्मस्वरूपाबोधस्यास्य च शास्त्रस्य साध्यसाधनलक्षणः सम्बन्धः इति अधिकारिप्रयोजनसम्बन्धाभिधेयविशिष्टं गीताशास्त्रम् । अत्र

[1] गीता १२२०

[2] शा भा

[3] पैशाचभाष्योपोद्धातः।

**शंङ्करभगवत्पादाः-**

इमं द्विप्रकारं धर्म निःश्रेयसम्प्रयोजनं परमार्थतत्त्वञ्च वासुदेवाख्यं परब्रह्माभिधेयं विशेषतः अभिव्यञ्जयत् विशिष्टप्रयोजनसंवन्धाभिधेयवत् गीताशास्त्रम् । यतः तदर्थविज्ञानेन समस्तपुरुषार्थसिद्धिः ।

एवं सकलपुरुषार्थसिद्धये सर्वेषां श्रेयोऽर्थिनां गीताशास्त्रस्य पठनं पाठनं श्रवणं तात्पर्यबोध विनाऽपि कल्पते इति गीतोक्त प्रमाणम्। उपनिषदः ज्ञानकाण्डात्मिका यासां सारसंग्रहभूता गीता-

**सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः ।**

**पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत्**[4] ।।

**"यावानर्थ उदपाने सर्वतः सम्प्लुतोदके । तावानर्थो वेदेषु ब्रह्मणस्य विजानातः"** इति सार्यकों द्विविधधर्मोपदेशस्येति। सर्वशास्त्रोपजीव्यत्वेन गीताया सर्वातिशायिमाहात्म्यम्। उपनिषदस्ता- वद्रहस्यविद्यात्वेन प्रसिद्धाः गीताशास्त्रं तु गुह्यतममिति तत्रैववधृतत्वात्। अतः कृतकृत्यता चरितार्थता समग्रस्य जीवनस्य तदा तदा हि गीताशास्त्रमनुसृत्य यथोक्तं कर्मयोगमाश्रित्य ज्ञानयोगेन सह भगवद्भक्तियोगेन जीवनस्य परमपुरुषार्थो साधितो भवेत्।

**गीतायोगसूत्रयोः ऐक्यम्-**

**युञ्जन्नेव सदात्मानं योगी विगतकल्मषः ।**

**सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते**[5] ।।

इति श्लोकस्यास्याभिप्रायः योगसूत्रतद्भाष्यानुगुणं व्याख्यानं कृतवान् सरस्वती मत्प्रभागः- यथा हि- **"ईश्वरप्रणीधानाद्वे"**[6] **तीव्रसंवेगानामासन्ने समाधिलाभे प्रस्तुते "ईश्वरप्रणीधानाद्वे" ति** पक्षान्तरमुक्त्वा प्रणीधेयमीश्वरं **"क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः**[7] "तत्र निरतिशयं सर्वज्ञबीजम्" **"स पूर्वेषामपि गुरुः कालेनानवच्छेदात्"**[8] इति त्रिभिः सुत्रैः प्रतिपाद्य तत्प्रणिधानं द्वाभ्यामसूत्रयत् **"तस्य वाचकः प्रणवः**[9]**"** "तज्जपस्तदर्थभावनम्, इति। ततः प्रत्यक्येतनाधिगमोऽप्यन्तरायाभावश्च। ततः प्रणवज-परूपात्तदर्थध्यानरूपाच्चे- श्वरप्रणीधानत्प्रत्यक्केतनस्य पुरुषस्य प्रकृतिविवेकेनाधिगमः साक्षात्कारो भवति। **उक्तानामन्त- रायाणामभावोऽपि भवति**[10] ।।

**मोक्षः-**

पुरुषार्थेषु चतुर्षु श्रेष्ठममुं तुरीयं संपादयितुं मुमुक्षु सज्जीकर्तुं नाना विधदर्शनानि स्वस्वप्रमाणनुगुणानानाविधपथो निर्दिशन्ति। आस्तिकदर्शनानां तावन्मुख्यं प्रमाणं बेदा एव । भिन्नवेदवाक्यानां भिन्नरीत्या गौणत्वं मुख्यत्वं च कल्पयित्वा तत्तद्दृष्टिविशिटानि विविधदर्शनानि एकैकरीत्या विभिन्नसंप्रदायेषु उपदिशन्ति ।आस्तिकदर्शनेषु वेदान्तदर्शनम् मुख्यतया उपनिशदः भगवद्गीतादिस्मृतयः, वेदान्त गीताप्रमाणानि च नेकरीत्याग्रथित्वा अद्वैतविशिष्टाद्वैताद्यनेक शास्त्राणि संप्रवृत्तानि तत्र अद्वैतेपि मोक्षसामय्यां भक्तेः अप्रतिमत्व विषये विवाद एव नास्ति परन्तु-

**भिद्यते हृदयग्रन्थिः चिद्यन्ते सर्वसंशयाः।**

**क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे**[11] ।।।

**ब्रह्मवेद ब्रह्मैव भवति**[12]।

इत्यादिश्रुतिवाक्यानिप्रमाणानि तथा च -

**यथैधर्धांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन ।**

**ज्ञानाग्निस्सर्वकर्माणि भस्मसात्कुरुते तथा**[13] ।।

इत्यादिभगवद्गीतावाक्यान्यापि मोक्षविषयेप्रमाणभावं भजन्ते । ज्ञानात् कर्मफलरूपस्य संसारस्य संपूर्णस्योच्छेदः प्रतिपाद्यतेऽत्र । नाहि ज्ञानकर्मसमुच्चय आश्रितः । परमात्मन्य- ध्वस्तमज्ञानमेव सर्वप्रपञ्चस्य उपादानकारणम् । प्रपञ्चोऽविद्याकार्यमित्यर्थः । अज्ञानं हि ज्ञानेनैव नश्यति यथा प्रकाशेन तद्विरुद्धस्य तमसो नाशस्तथा । कर्णश्च अज्ञानाविरोधित्वात् तन्नाशने कर्म नोपकुरुते । पुनश्च कर्मणा सम्पद्यमानानां लोकानामनित्यतां श्रुतिरेव दर्शयति-

**तद्यथेह कर्मचितो लोकः क्षीयते**[14]।

इत्यादि । यथा ब्रह्मज्ञानात्परं पुरुषार्थं दर्शयति च **ब्रह्मविदाप्नोति परम्**[15] । इत्यादिः कर्मणां ब्रह्मज्ञाने यद्यपि

[4] गीतामाहात्म्यम् श्लो.६

[5] गीता ६/२८

[6] योगदर्शनम्

[7] योगदर्शनम्

[8] योगदर्शनम्

[9] योगदर्शनम्

[10] गू.दी.६/२८

[11] मु.उ.२,२,४

[12] मु.उ,३,२,९

[13] भ.गी.४,३७

[14] छा.उ.४,१,६

[15] तै.उ.२,१

साक्षात्कारणत्वं नास्ति तथापि निष्कामकर्मानुष्ठानेन पापानि क्षीयन्ते।

तदिदमुच्यते विवेकचूडामणौ –

**चित्तस्य शुद्धये कर्म नतु वस्तूपलब्धये ।**

**वस्तुसिद्धिर्विचारेण न किञ्चत्कर्मकोटिभिः[16]।**

यथा च-

**दैवमेवापरे यज्ञं यागिनः पर्युपासते ।**

**ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुइति ।।**

**श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति ।**

**शब्दादीन्विषयानन्य इन्द्रियाग्निषु जुह्वति ।**

**सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे ।**

**आत्मसंयमयोगाग्झौ जुइति ज्ञानदीपिते ।।**

**द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे ।**

**स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः[17] ।।**

**निष्कर्षः-**

"अधुना सम्यग्दर्शनस्य यज्ञरूपत्वेन स्तावकतया ब्रह्मार्पणमन्त्रेस्थिते पुनरपि तस्य स्तुत्यर्थमितरान्यज्ञानुपन्यस्यति देवा इन्द्रावन्यादयः इज्यन्ते येन स दैवस्तमेव यज्ञ दर्शपूर्णमासज्योतिष्टोमादिरूपमपरे योगिनः कर्मिणः पर्युपासते सर्वदा कुर्वन्ति-न ज्ञानयज्ञम्। एवं कर्मयज्ञमुक्त्वाऽन्तःकरणशुद्धिद्वारेण तत्फलभूतं ज्ञानयज्ञमाह ब्रह्मान्नी सत्यज्ञानान्ता- नन्दरूपं निरस्तसमस्तविशेषं ब्रह्म तत्पदार्थस्तस्मिन्नन्नौ यज्ञं प्रत्यागात्मनं त्वं पदार्थं यज्ञेनैव। इत्थंभूतलक्षणे तृतीया एवकारो भेदाभेदव्यावृत्यर्थः। त्वं पदार्थाभेदेनैवोपजुहृति तत्स्वरूपतया पश्यन्तीत्यर्थः। अपरे पूर्वविलक्षणास्तत्वदर्शननिष्ठाः संन्यासिन इत्यर्थः। जीवब्रह्माभेददर्शनं यज्ञत्वेन संपाद्य तत्साधनयज्ञमध्ये पठ्यते श्रेयान्द्रव्यमया- यज्ञाज्ज्ञानयज्ञ" इत्यादिना स्तोतुम्"। तदनेन मुख्यगौणौ द्वौ यज्ञौ दर्शितौ, यावद्धि किंचिद्वैदिकं श्रेयः साधनं तत्सर्वं यज्ञत्वेन संपाद्यते तत्र श्रोत्रादीनि ज्ञानेन्द्रियाणि तानि शब्दादिविषयेभ्यः प्रत्याहृत्यान्ये प्रत्याहारपराः संयमाग्निषु धारणा ध्यानं समाधिरिति त्रयमेकविषयं संयमशब्देनोच्यते ।

**सहायकग्रन्थसूची**


1. वेदान्तसारः श्रीसदानन्दः, भारतीयविद्याप्रकाशनम्, दिल्ली – १९९९।
2. भक्तिरसविवेचनम्, प्राचार्यः श्रीसार्वभौमस्नातकोत्तरसंस्कृत, श्रीगुरुपूर्णिमा, महाविद्यालयवृन्दावनम्
3. श्रीमद्भगवद्गीता (शङ्करानन्दी), श्रीव्यासः, चौखम्बा संस्कृतप्रतिष्ठानम्, देहली-२००८।
4. गूढार्थदीपिका, श्रीमधुसूदनसरस्वती, चौखम्बासंस्कृतप्रतिष्ठानम्, देहली – २०१०।
5. भक्तिचन्द्रिका, डा,विश्वनाथ पाण्डेय, चौखम्बा सुरभारती प्रकाशन, वाराणसी-१९९५।
6. सिद्धन्तलेशसंग्रहः, श्रीमद्प्पयदीक्षितेन्द्रग्रन्थावलीःसिकन्दरावाद- १९७३।


**Disclaimer/Publisher's Note**: The views, findings, conclusions, and opinions expressed in articles published in this journal are exclusively those of the individual author(s) and contributor(s). The publisher and/or editorial team neither endorse nor necessarily share these viewpoints. The publisher and/or editors assume no responsibility or liability for any damage, harm, loss, or injury, whether personal or otherwise, that might occur from the use, interpretation, or reliance upon the information, methods, instructions, or products discussed in the journal's content.

************

[16] वि.चू ११

[17] भ.गी.४/२७-२८